No. ५६४४ च

Title श्रीचक्रभावनोपनिषत्

Author

Extent २ सं० १९५४

Subject उपनिषत् संपूर्णम्

नं० ५६४४-घ
श्रीचक्रभावनोपनिषत् (उपनिषत्)
पत्रे २ (द्वावेव) (सम्पूर्णम्)

१३२

नं. ~~१२९~~

१४१

नं. ११८४-५

श्वेताश्वतरोपनिषद्

२ पत्रे

उपनिषत्

लिपि सं. १८५८

१ ॐ नमस्त्रिपुरसुंदर्यै चक्रेश्वर्यै ॐ पूर्णमदः पूर्णमिदं पू
र्णात्पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते
ॐ शांतिः शांतिः शांतिः ॐ आत्मानमखंडमंडलाकारमा
वृत्य सकलब्रह्मांडमंडलं स्वप्रकाशमयं ध्यायेत् श्रीगुरुः
सर्वकारणभूता शक्तिः तेन नवरंध्ररूपो देहः नवशक्तिरू
पं श्रीचक्रम् वाराही पितृरूपा कुरुकुल्लाबलीदेवता माता
पुरुषार्थाः सागराः देहो नवरत्नद्वीपः त्वगादिसप्तधातुरोम
संयुक्ताः संकल्पाः कल्पतरवः तेजः कल्पकोद्यानं रसन
या भाव्यमाना मधुराम्ललवणतिक्तकटुकषायाः षड्रसाः
षड्ऋतवः ज्ञानमग्निः ज्ञेयं हविः ज्ञातृज्ञानज्ञेयानामभेद
भावनं श्रीचक्रपूजनम् नमः इति सहिताः शृंगारादयो नव
रसाः अणिमाद्या अष्टसिद्धयः कामक्रोधलोभमोहमदमा
त्सर्यपुण्यपापमया ब्राह्म्याद्यष्टशक्तयः आधारनवकं मुद्रा
शक्तयः पृथिव्यप्तेजोवायुराकाशशब्दस्पर्शरूपरसगंध
वाक्पाणिपादपायूपस्थरसनेन्द्रियाणि विकाराः कामा
कर्षिण्याद्याः षोडशशक्तयः वचनादानगमनविसर्गान
न्दादानोपादानोपेक्षा अनंगकुसुमाद्यष्टशक्तयः पूषालंबा
जु हूर्विश्वोदरी वरुणा हस्तिजिह्वा यशोवती गांधारी पुरु
षा शंखिनी सरस्वती इडापिंगलासुषुम्णा चेति चतुर्दशना
ड्यः सर्वसंक्षोभिण्यादिचतुर्दशारगा देवताः प्राणापानव्या

नोदानसमानननागकूर्मकृकरदेवदत्तधनंजयाइतिदश
वायवः सर्वसिद्धिप्रदादिबहिर्दशारगादेवताः एतद्वायुसं
सर्गोपाधिभेदेनरेचकः शोषकोदाहकः प्लावकःस्रावक
इतिप्राणमुख्यत्वेनजाठराग्निर्भवति क्षारकोद्गारकः क्षोभ
कोमोहकइत्यपानमुख्यत्वेनपंचविधोस्ति तेनमनुष्यादे णां
हगाः भक्ष्यभोज्यलेह्यचोष्यपेयात्मकंचतुर्विधमंनः पाचयं
ति एतद्दशकंवह्निकलाः सर्वज्ञाद्यन्तर्दशारगाः देवताः शी
तोष्णसुखदुःखेच्छाससत्वरजस्तमोगुणाइतिवशिन्यादिश
क्तयोष्टौशब्दस्पर्शरूपरसगंधाः पंचतन्मात्राः पंचपुष्पबाणाः
मनइक्षुधनूरागपाशोद्वेषोंकुशः अव्यक्तमहत्तत्वमहंकारइ
तिकामेश्वरीवज्रेश्वरीभगमालिन्यंतस्त्रिकोणगाः देवताः
पंचदशतिथिनित्याशुद्धानिरुपाधिकाचसादेवताकामेश्वरी
सदानंदस्वरूपा सदानंदपरिपूर्णत्वनस्वात्मैक्यपरदेवतासलि
लमितिसाहित्यकरणम् अस्तिनास्तिकर्तव्यमकर्तव्यमुपचा
रः तस्यबाह्यांतकरणमेकीकृत्यस्थितिरासनंरक्तशुक्लयो
रेकीकरणंपाद्यं उज्ज्वलदाशाद्यानुसंधानमित्याचमनम् रथ
चिद्ब्रह्ममस्मिसर्वांगस्रवणमितिस्नानं चिदग्निस्वरूपंचिदानं
दस्वरूपंपरानंदस्फुरणमितिवस्त्रं प्रत्येकंसप्तविंशतिधामभि
न्नत्वाज्ञानक्रियात्मकेच्छाज्ञानक्रियात्मकब्रह्मग्रंथिलसत्तंतुब्र
ह्मनाडीसूत्रमव्यतिषिक्तवस्तुसंग्रहीतस्मरणंविभूषणम्

सच्चित्सुखपरिपूर्णानन्दस्मरणंगंधम् समस्तविषयाणांम
नःस्थैर्येणानुसंधानंकुसुमम् तेषामेवसर्वदास्वीकरणा
मितिधूपपवनः अनवच्छिन्नोज्वलत्सच्चित्प्रकाशोदीपः
समस्तद्वैताद्वैतविसर्जनंनैवेद्यम् अवस्थात्रयाणामेकीक
रणंताम्बूलम् मूलाधारादिब्रह्मरंध्रपर्यंतं ब्रह्मरंध्रादिमू
लाधारपर्यंतंगतागतरूपेणप्रदक्षिणा सर्वदावस्थातुरीया
नमस्कारः देहशून्यंप्रथमाहुत्यानिमज्जनंबलिहरणम् स
त्यमस्तिनास्तिकर्तव्यमकर्तव्यमित्यात्मनिविलापनंहोमः मुदासीन,
श्री मत्पादुकानिमज्जनंपरिपूर्णध्यानम् एवंमुहूर्तद्व
यंमुहूर्तत्रयंमुहूर्तमात्रंघटिकामात्रंभावनापरोजीवन्मु
क्तोभवति तस्यचिंतितकार्याण्ययत्नेनसिद्ध्यन्ति स्वयमेव
शिवयोगीतिकथ्यतेकादिहादीनामवलोकेभावनापरो
जीवन्मुक्तोभवति इत्युपनिषत् ॐपूर्णमदःपूर्णमिदमि
तिपठेत् श्रीचक्रभावनोपनिषत्समाप्ता श्रीरस्तु ॥

१९५४ जम्बू मध्ये लिखितम्

नं. २२९

५३

नं०

श्रीचक्रभावनोपनिषत्

पत्राणि २ हैं २ (द्वावेव)

नं० ११८४

लिपि संवत् १९५४